# tulasIvivAhavidhiH

# તુલસીવિવાહવિધિઃ

## Document Information

Text title : tulasIvivAhavidhiH

File name : tulasIvivAhavidhi.itx

Category : devii, tulasI, devI

Location : doc_devii

Transliterated by : Shree Devi Kumar

Proofread by : Shree Devi Kumar

Acknowledge-Permission: Mahaperiaval Trust

Latest update : June 12, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

tulasIvivAhavidhiH

# તુલસીવિવાહવિધિઃ

(ઇક્ષુદણ્ડનિર્મિતે પુષ્પાદ્યલઙ્કૃતે મણ્ટપે વિવાહઃ । તુલસી
હરિદ્રાચન્દનકુઙ્કુમપુષ્પાદ્યાલઙ્કૃતા સ્વીયવેદ્યાં પ્રથમં પૂજ્યતે ।

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥

પરમેશ્વરપ્રીત્યર્થં શુભે શોભને મુહૂર્તે ... શુભતિથૌ
તુલસ્યાઃ વિષ્ણુના સહ વિવાહોત્સવમાચરિષ્યે । (અપ ઉપસ્પૃશ્ય)
વિઘ્નેશ્વરપૂજાં કલશપૂજાં તુલસી પૂજાં ચ યથાવિધિ નિર્વર્ત્ય ...
વિષ્ણું વિવાહાર્થે વરાર્હ વસ્ત્રાલઙ્કરણ પુષ્પમાલાદિભિઃ અલઙ્કૃત્ય
વાદ્યઘોષગીતપુરસ્સરં વિવાહમણ્ટપમાનીય કર્તા નારિકેલ-કદલીફલ -
તામ્બૂલાદિભિઃ ઉપસૃત્ય મણ્ડપે આસને પ્રતિષ્ઠાપ્ય પ્રાર્થયેત્-
આગચ્છ ભગવન્ દેવ અર્હયિષ્યામિ કેશવ ।
તુભ્યં દદામિ તુલસીં પ્રતીચ્છન્ કામદો ભવ ॥

આસનમિદં, અલઙ્ક્રિયતામ્ । પાદ્યં સમર્પયામિ ।
અર્ઘ્યં સમર્પયામિ, આચમનીયં સમર્પયામિ ।
મધુપર્કં સમર્પયામિ । હરિદ્રાલેપ-મઙ્ગલવિધિં સમર્પયામિ ।
તૈલાભ્યઙ્ગપૂર્વકં મઙ્ગલસ્નાનં સમર્પયામિ ।
વસ્ત્રાલઙ્કરણપુષ્પમાલાઃ સમર્પયામિ । ગન્ધાન્ધારયામિ । ગન્ધોપરિ
હરિદ્રાકુઙ્કુમં સમર્પયામિ । પુષ્પૈઃ પૂજયામિ । ૧૨-૨૪-૧૦૮
નામભિરર્ચયેત્ । (વધૂવરૌ પરસ્પરમભિમુખૌ સ્થાપયિત્વા) ...
ગોત્રોદ્ભવાં ... શર્મણઃ પ્રપૌત્રીં, ...
શર્મણઃ પૌત્રીં, શર્મણઃ પુત્રીં
તુલસીનામ્નીં ઇમાં કન્યકાં અજાય અનાદયે શ્રી વિષ્ણવે વરાય દદામિ ।
(ત્રિરુક્ત્વા)
અનાદિમધ્યનિધન ત્રૈલોક્ય પ્રતિપાલક ।

ઇમાં ગૃહાણ તુલસીં વિવાહ વિધિનેશ્વર ।તુલસીવિવાહવિધિ। ઇન્ફ઼્
પાર્વતી બીજસંભૂતાં બૃન્દાભસ્મનિ સંસ્થિતામ્ ।
અનાદિમધ્યનિધનાં વલ્લભાં તે દદામ્યહમ્ ॥

પયોઘૃતૈશ્ચ સેવાભિઃ કન્યાવદ્વર્ધિતાં મયા ।
ત્વત્પ્રિયાં તુલસીં તુભ્યં દદામિ ત્વં ગૃહાણ ભોઃ ॥

વાદ્યઘોષ - વેદસ્વસ્તિવાચન - મઙ્ગલાશીર્ભિઃ ઉભૌ મેલયિત્વા
ગીતાદિભિઃ સન્તોષયેત્ । સાયમપિ પુનઃ પૂજાં કૃત્વા સ્ત્રીધનં
યથાશક્તિ દદ્યાત્ ।
વિવાહોત્સવપૂર્તૌ
વૈકુણ્ઠં ગચ્છ ભગવન્ તુલસ્યા સહિતઃ પ્રભો ।
મત્કૃતં પૂજનં ગૃહ્ય સન્તુષ્ટો ભવ સર્વદા ।
ગચ્છ ગચ્છ સુરશ્રેષ્ઠ સ્વસ્થાનં પરમેશ્વર ।
યત્ર બ્રહ્માદયો દેવાઃ તત્ર ગચ્છ જનાર્દન ।

ઇતિ ઉભૌ અભ્યનુજ્ઞાપયેત્ મઙ્ગલારાર્તિકેન સહ ।
તુલસીં યથાપૂર્વં રક્ષેત્ ।

Encoded and proofread by Shree Devi Kumar

*tulasIvivAhavidhiH*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*